# Purushottamaproktam Shri Mahalakshmimantra Stotram

# પુરુષોત્તમપ્રોક્તં શ્રીમહાલક્ષ્મીમન્ત્રસ્તોત્રમ્

## Document Information

Text title : Purushottamaproktam Shri Mahalakshmimantra Stotram

File name : puruShottamaproktaMshrImahAlakShmImantrastotram.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, lakShmI, mantra, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 120/1-24||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# પુરુષોત્તમપ્રોક્તં શ્રીમહાલક્ષ્મીમન્ત્રસ્તોત્રમ્

શ્રીપુરુષોત્તમ ઉવાચ ।
શ‍ૃણુ લક્ષ્મિ! મહાલક્ષ્મ્યા મન્ત્રાન્તરં વદામિ તે ।
યદારાધનતો ભૂયાત્સાધકો ભુક્તિમુક્તિમાન્ ॥ ૧॥

“ૐ મહાલક્ષ્મી મહામાયા મહાનારાયણ્યૈ કમલવાસિન્યૈ
મહાવિષ્ણુપ્રિયાયૈ નમઃ, ૐ શ્રીં હ્રીં ક્લીં ણીં મ્લીં ષ્ણીં
મહામાત્રે પુરુષાર્થવર્ષિણ્યૈ સ્વાહા” ॥ ૨॥

પઞ્ચાશદક્ષરં દિવ્યં મહામન્ત્રં જપેત્ સદા ।
ઋષિર્નારાયણશ્ચાઽહં મહાલક્ષ્મીર્હિ દેવતા ॥ ૩॥

સ્વર્ણચમ્પકરૂપાભાં સર્વભૂષણભૂષિતામ્ ।
કૃપાહાસ્યપ્રસન્નાસ્યાં ભક્તાનુગ્રહતત્પરામ્ ॥ ૪॥

સર્વૈશ્વર્યાદિસમ્પૂર્ણાં સર્વામ્બરવિરાજિતામ્ ।
કોટિસૂર્યેન્દુકાન્તાં ચ રત્નહારાદિ બિભ્રતીમ્ ॥ ૫॥

કમ્ભરાશ્રીમહાલક્ષ્મીં શ્રીમદ્ગોપાલરૂપિણીમ્ ।
મહાવિષ્ણુમહાશક્તિં ધ્યાયેચ્છ્રીમાતરં રમામ્ ॥ ૬॥

જપેન્મન્ત્રાયુતં મન્ત્રલક્ષં વાઽથ દશાંશતઃ ।
પાયસેન હવનં ચ કુર્યાચ્છ્રીચન્દનાર્ચનમ્ ॥ ૭॥

સ્થાપનં પૂજનં કુર્યાદારાર્ત્રિકં નિવેદનમ્ ।
જલં તામ્બૂલકં દદ્યાત્ ક્ષમાપનં વિસર્જનમ્ ॥ ૮॥

નવશક્તીઃ પૂજયેચ્ચ મહાલક્ષ્મ્યાઃ સ્વરૂપિણી ।
વિભૂતિમુન્નતિં કાન્તિં સૃષ્ટિં કીર્તિં ચ સન્નતિમ્ ॥ ૯॥

વ્યુષ્ટિમુત્કૃષ્ટિમૃદ્ધિં ચ દક્ષિણે તુ ગજાનનમ્ ।
વામે કુસુમધન્વાનં પૂજયેચ્ચન્દનાદિભિઃ ॥ ૧૦॥

ઉમાં શ્રીં ભારતીં દુર્ગાં ધરણિં વેદમાતરમ્ ।
દેવીમુષાં ચાષ્ટદિક્ષુ ગઙ્ગાં યમીં ચ પૂજયેત્ ॥ ૧૧॥

પાદપદ્મક્ષાલનાયાઽઽનીતા અપઃ પ્રપૂજયેત્ ।
શઙ્ખપદ્મનિધી ચાઽર્ચેત્ પાર્શ્વયોર્ધૃતચામરૌ ॥ ૧૨॥

ધૃતાતપત્રં વરુણં પૂજયેત્ પશ્ચિમે તથા ।
રાશીન્નવગ્રહાઁશ્ચાપિ દિગ્ગજાનર્ચયેત્તથા ॥ ૧૩॥

લોકપાલાઁસ્તદસ્ત્રાણિ પૂજયેત્ત્વનલે તથા ।
દૂર્વાભિરાજ્યસિક્તાભિર્જુહુયાદાયુષે નરઃ ॥ ૧૪॥

ગુડૂચીમાજ્યસંસિક્તાં જુહુયાત્ સપ્તવાસરાન્ ।
અષ્ટોત્તરસહસ્રં યઃ સ જીવેત્ પૂર્ણમેવ હ ॥ ૧૫॥

હુત્વા તિલાન્ ઘૃતાભ્યક્તાન્ દીર્ઘમાયુષ્યમાપ્નુયાત્ ।
શાલિભિર્જુહ્વતો નિત્યમષ્ટોત્તરસહસ્રકમ્ ॥ ૧૬॥

અચિરાદેવ મહતી લક્ષ્મીઃ સઞ્જાયતે ધ્રુવા ।
નારીકેલઘૃતાદ્યૈર્જુહુયાત્કુબેરવદ્ભવેત્ ॥ ૧૭॥

ગુડઘૃતાભ્યાં હવનાદન્નવાન્ સમ્પ્રજાયતે ।
એવં યો ભજતે લક્ષ્મીં કમ્ભરાં લલિતાં શ્રિયમ્ ॥ ૧૮॥

સમ્પદસ્તસ્ય જાનન્તે મહાલક્ષ્મીઃ પ્રસીદતિ ।
દેહાન્તે વૈષ્ણવં ધામ લભતે પારમેશ્વરમ્ ॥ ૧૯॥

શ્રીપુરે દિવ્યલોકે સા માતા લક્ષ્મીઃ પરેશ્વરી ।
વિવિધાન્ સ્વાવતારાન્ હિ ત્રૈલોક્યાં કુરુતે સદા ॥ ૨૦॥

મહાલક્ષ્મીર્મહામાયા મૂલપ્રકૃતિરીશ્વરી ।
પારબ્રાહ્મી ચાઽક્ષરી ચ પરેશી પુરુષોત્તમી ॥ ૨૧॥

રાધાલક્ષ્મીશ્ચ ગઙ્ગા ચ વિરજા ચ સરસ્વતી ।
સાવિત્રી ચાથ ગાયત્રી કમલા પદ્મિની રમા ॥ ૨૨॥

તુલસી માધવી પદ્મા ચેત્યેવં ખ્યાયતે હિ સા ।
વિષ્ણુકાઞ્ચ્યાં મહાલક્ષ્મીર્લલિતા વર્તતે સતી ॥ ૨૩॥

શિવકાઞ્ચ્યાં સૈવ દેવી કામેશ્વરી શિવપ્રિયા ।
વર્તતે પરમા પૂજ્યા નૈકરૂપા હિ કમ્ભરા ॥ ૨૪॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૨૦-અધ્યાયાન્તર્ગતં પુરુષોત્તમપ્રોક્તં શ્રીમહાલક્ષ્મીમન્ત્રસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૨૦/૧-૨૪॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 120/1-24..

Proofread by PSA Easwaran

---

*Purushottamaproktam Shri Mahalakshmimantra Stotram*
pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*